This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ अथायमथशब्दो मंगलार्थः आनंतर्यार्थश्च ग्रंथमध्ये मंगलाचरणप्रयोगः शिष्टैः शि-
ष्टः। अथेति। स्यादिशब्दक्रियाकथनानंतरं। अथवा तद्धितसंज्ञकप्रत्ययराशिनिरूपणानंतरं आख्या-
तसंज्ञकाः प्रत्ययाः निरूप्यंते आख्यायते कर्तृकर्मादयो यैस्ते आख्याताः। नामाधिकारव्यावृत्त्या
धात्वाधिकारमाह। धातोरिति। ननु धातुरेव कस्तत्राह। भ्वादिरिति। आ त्. ५१ अनुदात्तश्च ङ्श्चेतौ
इतौ यस्य स अनुदात्तङित् ११ तस्मात् ५१ ञ इत् यस्य स ञित्। स्वरितः इत् यस्य स स्वरितेत्।
ञिच्च स्वरितेच्च [illegible] ञित्स्वरितेत् तस्मात् ५१ उभे उदात्तभ्वादिधातुपाठात् ज्ञातव्यं। अनियमे
नोभयपदप्राप्तौ नियममाह। आत्मगामी। कुत इयं व्यवस्था तत्राह। अन्वर्थादिति। आत्मने
पदपरस्मैपदरूपायाः संज्ञा तस्याः अनुगतोऽर्थः आत्मार्थः परार्थः पाकादिरूपः तदुक्तादित्ये-
थः। आत्मार्थं पचते। परार्थं पचति। परतः अन्यत् ११ आत्मनेपदपरस्मैपदयोः संज्ञांतरेण वि-
भागमाह। नवेति। आत् त्यं इति लाघवार्थं सौत्रीं संज्ञां व्यवहरति। प्राग्व्योपरि समाप्तश्च वर्ग

॥ श्री ॥ [illegible]

Accession: No. ~~328~~ M 866

Title:- सारप्रदीपिका

Subject:- व्याकरण

Author:-> भट्ट ~~[illegible]~~ जगन्नाथ

Date → ?

पत्र: — 28

KKSU LIBRARY
RAMTEK
441 106
M-866
Dist Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानःव्यापारः इति विशेषः।आरब्धापरिसमाप्ता इति पाठे सुगमं।आरब्धं अपरिसमाप्तं यस्मिन् काले इ
त्यर्थः।लट् इति संज्ञाप्रदर्शनं शिष्याणां अन्यत्रापि परिचर्यार्थं।तथा च दश लकाराः।तिबादीनां स्था
निन इति पाणिनिमतं।तिबादयो युगपत्प्राप्तास्तत्र नियममाह।नाम्नीति।ननु नाम्नी चेत्यनेनैव
युष्मदस्मदोरपि गृहीतत्वात् युष्मदि वास्मदि चेति तयोः पृथगुपादानं व्यर्थं।ततो नामत्रा ह्रस्वा
त्राधिकारे सरस्वती कंठाभरणोक्तं पृथग्वेदितव्यं।तथा चोक्तं।युष्मदस्मद्व्यतिरिक्तसिद्धार्थ
शब्दो नाम इति स्मरणात्।तिबादिदशलकारेषु तिबादित्रयाणां प्रथमपुरुष इति संज्ञा पू
र्वाचार्याणां।एवं सिबादित्रयाणां मध्यमपुरुष इति।मिबादित्रयाणां उत्तमपुरुष इति।एवं
सर्वत्र परस्मैपदात्मनेपदयोर्ज्ञेयं।कर्त्तरि शप् ७१ पं ११ चेत्स्य व्याख्यायं।तिपः पकारो ङित्वव्यावृत्त्यादि
कार्य इति पित्कार्यार्थः।विकरणस्तु धातुगणविभागज्ञापकः प्रत्ययः।तस्य भेदः पृथक्त्वं त
स्य ज्ञापनार्थः।तथाहि।तुदादेर इति प्रत्ययात् अयं प्रत्ययो भिन्नः।अथवा विकरणभेदः।विकर ॥१

णनिमित्तो विशेषः।तस्य ज्ञापनार्थः।अप्रत्यये गुणो न भवति।अपृत्प्रत्यये गुणो भवति।इति विशेषः।
तादिशब्देन ताताररौतारस इत्यादिकाः।तादि इति आदिशब्देन सिसीग्रहणमपि।ङित्वविधानस्य
प्रयोजनमाह।कुचकुचकौ गौ इतौ यस्य स किंत् तस्मिन् ७१ ह्रिरुक्ताद्धा[illegible]तोः परः ऋ स्थु स्थुस्
न स्थुस् अस्थुस् त[illegible]त स्मिन् किंति ७१ अस्थु सि[illegible]ति धात्वधातुसाधारणं।तेन स्थुनुतः।स्थुसंव
ज्ञीयित्वेति यथा ऋतेच ऋरित्यादावपि गुणप्रसक्तिस्तत्त्वात् इत्यर्थं स्पष्टयति।कृतद्विर्वचनाद
सिपरेपि।तथापि तद्दोषतादवस्थ्यादतो व्याकरोपति।धातोः कृतं यद्द्विर्वचनं तस्मात्परो यस्य
नंतरं अनः ङजातेन सिगुणो भवति।यत् यस्मात्कारणात् किति ङिति च परे गुणः प्रतिषिद्धः।
तत् तस्मात्कारणात् अपृत्प्रत्यये निमित्ते गुणो भवतीत्यर्थः।अदे सां ७१ अदे इत्यत्र अकारैका
रौ तिबादिप्रत्ययस्येत्यर्थः।तेन ऐ स्तत इत्यादौ न।प्रकरणभेदान्न स्यादौ।युगपन्नामादि
षु प्रयुक्तेषु कः पुरुषो भवतीत्याशंक्य माह।अव्यवधानादिति।क्रियापदेन यस्य व्यवधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सारस्व०टी०
॥२॥

स्तू ५

नंनास्तितदनुसारेणपुरुषविशेषोभवति।अत्रव्यवधानंसूत्रोक्तंग्राह्यं।नतुवाक्यस्थं।विधिसं
भावनयोः७इयादादिईमहीत्यंतंसां१२कर्त्तव्यःकरणार्हःकथ्यतेइत्यर्थः।कर्त्तव्यार्थःपुरुषप्र
यत्नयोग्यसमीहितसाधनंयागादिविधिः।तस्योपदेशोप्यज्ञातस्यज्ञापनंविधिरुच्यते।
यासां११आशीःप्रेरणयोः७२तुबादिआमहैपूइत्यंतंसां१३अतहेतुंकूहिरूपस्यनतु
अ५ तातङ्ःपस्येतिवक्तव्यं।भवतात्।अनद्यतने७३तीते।दिबादिदिपूमहीत्यंतंसां१३अनद्यत
नस्यलक्षणमाह।अतीतायाइति।सतावान्कालःअष्टयामात्मकःअद्यतनः।ततोन्योअ
तीतोअनागतोवाअनद्यतनः।तस्मिन्अतीतेधात्वेदिबादयःप्रत्ययाःस्युः।भवंति।भवति।भ
मु३ वेत्।भवतु।अभवत्।परस्मैपदिनंधातुमुक्त्वाआत्मनेपदिनंधातुमाह।एधवृद्धौ।अका
रःअनुदात्तः।अतएवआत्मनेपदार्थः।एधते।एधेत।एधतां।एधत।स्वरादेरित्यत्र
पूर्वसंधिःक्रियतेतदाऐधतइत्यादिविरुध्यते।ततःपूर्वंधातोरेकेनअटासंधिःपश्चा ॥२॥

४६ दर्शनांकनयोः।१

दन्येनाईक्षते।ईक्षेत।ईक्षतां।ऐक्षत।डुपचष्पाके।डुकारषकारावनुबंधौकार्यार्थौ।द्वितस्त्रिमकूत
इतेषिड्रिदामङूइतिकार्यार्थौ।चकारेत्वकारःस्वरितः।अतउभयपदार्थः।पचति।पचेत।पचतु।अ
अपचत्।पचते।पचेत।पचतां।अपचत।एवमन्येपि१चादयः॥गाङ्गतौ।ङकारआत्मनेपदा
र्थः।गाते।अत्रसवर्णेदीर्घः।गाअंतेइत्यत्रआतोंतोदनतः।इत्यनेनसूत्रेणअंतस्यअत्।अतःसव
र्णेदीर्घः।गाते।गासे।गाथे।गाध्वे।यस्यालोपोवक्तव्यइतिवक्तव्यात्।अत्रैसांकारलोपोवेतिकेचित्।
गे।गे।गावहे।गामहे।गेत।गेयातां।गेरन्।गातां।अगात।अगातां।अगात।तिपूअपूगुणः।इक्
गतौ।अयति।अयेत्।अयतु।आयत्।इत्यादि।एवंक्षिक्षये।जिजये।फङ्शोधने।ङित्वादात्म
नेपदं।अपूगुणः।पवते।पवेत।पवतां।अपवत।तृतरणे।तरति।तरेत्।तरतु।अतरत्।देङ्पा
लने।दयते।दयेत।दयतां।अदयत।धेट्पाने।धयति।धयेत्।धयतु।अधयत्।कैगैरै
शब्दे।कायति।गायति।रायति।ग्लैम्लैहर्षक्षये।ग्लायति।म्लायति।त्रैङ्पालने।त्रायते।त्राये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्य॰
॥३॥

ता।त्रायतां।अत्रायत।दैपृ शोधने।दायति।दायेत।दायतु।अदायत।ध्यै चिंतायां।ध्यायति।ध्यायेत।ध्या
यतु।अध्यायत।ज्योङ् नियमव्रतादेशोपनयेषु।ओकारांतः एकएव सौवादिकः।ज्यवते।ज्यवेत।ज्य
वतां।अज्यवत।आकारांता धातवो न संति।एवमन्येपि स्वरांता हसांताश्च सौवादिका धातुपाठाद
वगंतव्याः।अतः परं अदादिकप्रक्रियोच्यते।स एव विकरणधातुभेद ज्ञापकः।प्रत्ययः स तस्मात्।शि
ङ्ः सर्वत्र गुणो विहितः।शिश्ये किं चिदिव श्रमादिव्यादिमहाकविप्रयोगो विरुध्यते।तत्र विष
ये इति विशेषणीयं।अबादौ ११ ईसां ११ पिति ७१ अबादावपिति स्मि।इत्यत्र द्विपकारको निर्देशः।अत्र
द्वितकारको निर्देशात्सकारः खसेव पाशसानामिति सूत्रेण कारा ज्ञातः तेनेदकारे पिति परे सवति
सूत्रे वृत्तौ चोच्चार्यौ।तेन गुणः स्यात्।अपू आदिर्यस्य स अबादिस्तस्मिन् अबादौ।अथवा अबादौ
विषयेऽस्मिन् व्याख्याने आदिशब्द प्रयोजनं मृग्यं।अद्विषये एतावतैव चरितार्थत्वात्।तस्मा
त्।व्याख्यानांतरमपि।अपू आदिस्थानं यस्य स अबादि लुङ्।तस्मिन् अबादौ लुङि विषये ई प्र ॥३॥

x अनापि ५

प्रत्ययः स्यात्।अत्र केचिदेवं परिहारमाहुः।अबादौ विति इयं च भावे सप्तमी।अबादौ कृते सतीत्य
र्थः।आदिशब्दात् अपोलुङि धातोर्गुणे च कृते सति पश्चादीकार प्रत्ययः।न नु नु धोंतो रिति सूत्रस्य
कार्यं।धो धांतो रियुवौ स्वरे।धौ वे इति सूत्रात्स्यांसे स्यति।किं नु धातो रिति सूत्रेण।सत्यं।तत्र सू
त्रद्वयं स्यादि विषयं।तयोरेवार्थेन निबध्यते।नु धातोरिति।अनेक स्वरस्या संयोगपूर्व
स्य धातो रिवर्णोवर्णयोः यो नो रिवर्णस्य वः।नोंओः वः।अस्यार्थः।धातो रु वर्णस्य वत्वं न स्या
वति।अनपिग्रहणं जुहोतेरेव।अद्विषये वकार प्राप्त्यर्थं।तेन जुहोति जुहुतः।किं संबो सुव
ति।अनेक संयोग पूर्वस्य चिति।तु शब्दात् यंती स्यादौ अनेक स्वरत्वाभावे पियकारो स्
वति।ईयतु रित्यादौ अनेक स्वरस्यासंयोगपूर्वत्वेपि न स्वतीति द्रष्टव्यं।भुवः पुंवत्सु तिबा
दिषु विशेषमाह।भुव इति।भुव आहश्चादेशः।अत्र आह इति अकार उच्चारणार्थः।तसां ११ थे ७१
परोक्षो।विहिते गुणबादिषु वृध्यादिकार्यं।अत्र वर्त्तमानकालभावात्।तिबादि आदेशलात्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्ना। वैविल्याप क्रूवयोः परोक्षेणुणवादिपंच स्वपिब्रुवआहआदेत्राइतिकेचित्। आह। आहतुः। आ
हुः। आत्थ। आहथुः। ब्रुवइति। ब्रुवीति। ब्रूयात्। ब्रवीतु। अब्रवीत्। ब्रूते। ब्रुवीत। ब्रूतां। अब्रूत। आ
दित्राद्याक्षेअन्येपिधातुपाठात्तत्व्याः। ख्याप्रकथने। ख्याति। ख्यायात्। ख्यातु। अख्यात्। ख्याश्रौ
चे। स्नाति। स्नायात्। स्नातु। अस्नात्। इत्यादि। सस्वरआदिर्द्विरद्विः। इदं सूत्रंप्रसंगाद्दिह लिख्य
तं। उत्तरत्रास्योपयोगो भविष्यति। अपानामित्ति। जवभ्यः पूर्वेषां झपेकदेशानां झढधघभानां
जबाजवंति। चपेभ्यः पूर्वेषां खफछठथानां चपाजवंती तिज्ञातव्यं। नुधातोरिति। अनेकस्व
रस्येतिनियमात्। नानप्यो वर्द्दत्तिग्रियमाद्धकारः। जुहोति। क्वचिदन्यत्रापिनु। वमोः पर
योः जुहोतेरुवर्णस्य लोपइत्यर्थः। जुह्वः। जुहुरः। छंदसि। तिबादिप्रत्ययोविध्यर्थेशयः॥ अ
ग्निते त्रंजुहोति। अग्निहोत्रं जुहुयादित्यर्थः। पाणिनीयानांमते विधौविहितातिबादिप्रत्य
यानांसंज्ञाभैलोट्॥ जुहोति। जुहुयात्॥ जुहोतु। अजुहोत्। अजुहुतां। अजुहवुः। द्वैः ५२॥

द्विरुक्तधातोरन्तउस्थभवति। अङिपरेनेतिवाच्यम्। तेनअभीपवन्नित्यादौन। अघुसीत्यत्कत्वात् गुणः। अजुहवुः॥
ओहाङ् गतौ। ओकारओदित्कार्यार्थः। ल्याद्याद्दितः इतिसूत्रविशेषणार्थः। द्वैः ६१। नोद्विपदमिदं सूत्रम्। कार्यद्वय
विधायकम्। तौइतितच्छब्देनपूर्वपरामर्षः। लोपोनुवर्त्तते। इकारस्थेतिर्ईहसेइत्यतः अनुवर्त्तते। जिहीते। [illegible]
हीत। जिहीताम्। अजिहीत। ओहाक् त्यागे। आल्लोपापिङितिवक्तव्यः। जह्यात्। इईः वाहौ। हेस्ताविति
ईकारः ईकारस्थवाभवति। जहीहि। जहाहि। जहिहि। वाराश्यात्। ङितिहसेपरेइकारोपि। तेननजिहीतइत्या[illegible]
कुरित्यत्रहेस्तौरित्यनेनआकारलोपः सिद्धः। उंसिपरेआल्लोपइतिपुनर्वचनं द्विरुक्त्यभावेपिअदुरि[illegible]
रलोपार्थं। ओहाक् त्यागे। ओकारस्यानेओदित्कार्यार्थः। ककारः किक्कार्यार्थः। अथवाधातुभेदः। [illegible]
गतौ। हाकृत्यागे। इतिभेदोभवतु। जहाति। जह्यात्। अहातु। अजहात्। दादेरिति। हस्तावित्यस्यापवादः। दादे[illegible]
दियहणेनदाहावितिबहुवचनेन। डुदाञ्दाने। डुधाञ्धारणपोषणयोः। सोपसर्गयोर्ग्रहणम्। प्रदत्तः। निधेहि। द्र
त्यादि। नयोर्दइश्विदंसूत्रंदधातेर्नेतिवक्तव्यं। तेनधत्तः। धत्थ। अथवाधत्तइतिअत्रनयोर्कद्दरतिनभवति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वाभाविकस्य सांतत्वाभावात् । अथवा तथोऽधः तथः अधः इति परिच्छेदः अतः अधः न दधातेरित्यर्थः ।
तदाऽस्य सांतस्य धातोः परस्य रस्य तकारस्य थकारस्य च अभ्यासत्वं तिङ् इति वृत्तिः आदिजबानामि
त्यतोऽस्यानुवृत्तेरित्यपि व्याख्यायसीद् दधाति । दधात् । दधातु । अदधात् । दधीत । दत्तां ।
अदत्तां । दधाति । दध्यात् । दधातु । अदधात् । धत्ते । दधीत । धत्तां । अधत्त । एवमन्येपि धातुपाठ
तज्ञेयाः । दिवु क्रीडे । द्युति वे हिंः प्रकाशः कांतिः शरीरस्य शोभा इति भेदः । उकार इद्विक
ल्पार्थ इति । उदितः क्त्वा वट् इति विशेषणार्थः । दीव्यति । दीव्येत् । दीव्यतु । अदीव्यत् । इत्यादयो
धातुपाठात् । ओ हिंष्मः स्ना । सेकू सृपू सृ स्तृ स्तृ ज स्तृ त्यान्येदंताजंतसादयः । षोपदेशाः स्य
ताः स्वष्क । स्वित् । स्विद् स्वंज स्वपू प । स्मिङ् ॥१॥ नोपदेशास्तु नन्दनाथा हू धृ क्ष्नून टः ॥
नकारजावनुस्वारपंचमौ झलि धातुषु ॥१॥ ष्ठिवु ष्वष्क ष्विवां षः सोनेतिवक्तव्यां प्रादेश्वत
धातौ सुनमामित्यत्र नाम्नश्च कृतासमासः । इत्यत्र वकारस्तस्मात् क्षकाराकृतोपरेत्रादीनां
||५||

ऊर्यो नोच्च सुमो सान्तिहितः । तत्र उपसर्गेबलात् स्यसांतस्य अस्ता । स्तन । सो । स्तुवः । स्था । से । [illegible]
सं ज स्वं आगत्यैस धाऽप्रति पूर्वे सदय ऊ ज्ञे सिचाऽवस्त्न तोज नार्थ यव हर्वे स्वनाप [illegible]
पूर्वे सेचा । सुऊ ऊ ऊर्जे स हानां यः षोऽहंतरेपि न वृति । दशानांस्थानां दुरूकानां चाऽउर्वेज्ञो
पसर्गो नतेण णादिधातु हमीनाहि न्वा त्रियशांतनयशांतनशांत था ते नैव शाऽनुक्रमे नण
त्वनिमित्तेन न स्याणो नवति । गदनदपद दाधीमा स्तो हन्या या द्रा प्सा दि स्यांत वह्न वपृ
वहे शाम्यचि दिहांतन श्च णत्वं । वानिंसनिक्ष निंद मवांतहानां कादि स्यादि स्थांत वज्ज
धात्वं नते ने श्वेति च कारो व्याख्येयः ॥ षुञ् अभिषवे । अभिषुणोति । अभिषुणुयात् ।
अभिषुणोतु । अभ्यषुणोत् । सुनोति । सुनुयात् । सुनोतु । असुनोत् । सुनुते । सुन्वी
त । सुनुतां । असुनुत । चिञ् चयने । चिनोति । चिनुयात् । चिनोतु । अचिनोत् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिनुते। चिन्वीत। चिनुतां। अचिनुत। शकु शक्तौ॥ उवेमोवोर्लोपदृत्यत्रापि संयोगपूर्वस्यो
कारप्रत्ययस्य न लोपः। शक्नुदि इति। वक्ष्य। तेन शक्नुवइत्यत्रापि न कुतो वा शब्दात्। शक्नु। शक्नो
तु। अशक्नोत्। इत्यादि। रुधिर् आवरणे। रुणद्धि। यमायपेस्ये स्से न स्यति मनसोत्स्ये
स्यास्ति द्रवक्तव्यं। नुधातोरित्यत्र विकरणस्य जोरितिनकारसहितस्य ठप्रत्ययस्य
विशेषणार्थं। तेन नुधातुर्गोरिति वक्तव्यं। नन्वंति। नहु विस्तारे। तनोति। तनुयात्। तनो
तु। अतनोत्। तनुते। तन्वीत। तनुतां। अतनुत। दीर्घत्वं प्रसक्तं लोपस्य तद्विकारस्य वा
सिद्धत्वात् वक्तव्या। तेन कुर्यात्। कुर्वंति। डुकृञ् करणे। करोति। कुर्यात्। करोतु। अक
रोत्। कुरुते। कुर्वीत। कुरुतां। अकुरुत। इत्यादि। तुद व्यथने। तुदति। तुदेत्। तुद
तु। अतुदत्। इत्यादि। डुक्रीञ् द्रव्यविनिमये। क्रीणाति। क्रीणीयात्। क्रीणातु। ॥६॥

अक्रीणात्। क्रीणीते। क्रीणीत। क्रीणीतां। अक्रीणीत। इत्यादि। शिष्याणां ग्रंथांतरपरिचर्यायै विभक्ती
नां संज्ञाविशेषमाह। एतद्वेति। एतद्विभक्तिचतुष्टयं धिकरणाहितस्थान तु यकृप्रत्ययसहितम्॥
यक्सहितं आर्द्धधातुकत्वं। लिङ्लिटौ सार्वधातुकं आर्द्धधातुकं शेषइत्युक्तत्वात्। अविषयः। अन
द्यविषयएवएव। सारस्वतमतेपरमतमिति कर्तरि विहितं तिबादि विभक्तिचतुष्टय व्यतिरि
क्तआख्यातप्रत्ययः शश्रानुशानौ विहाय यंत्र प्रत्ययश्च इति सार्वधातुकार्द्धधातुकसंख्या
ज्ञेया॥ श्री॥ इत्याख्याते कर्तरि विभक्तिचतुष्टयप्रकाशः॥ ७॥ ॥अथेति॥ आख्या
तचतुष्टयकथनानंतरं यक्प्रत्यये परे प्रक्रिया निरूप्यते॥ कर्तृव्यापारलक्षणक्रियाए
व भावना भाव इत्यर्थः। अकर्मकेभ्यो बाह्यकर्मरहितेभ्यः सकर्मकेभ्यो बाह्यकर्मणा सहिते
भ्यः। तत्र नित्यं कर्मधात्वर्थः। यथा पचतीत्यत्र पाकं करोतीति गम्यते। यथा शेते इत्यत्र शयनं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सारस्वती०
॥८॥

करोतीत्यर्थः। तेन सकर्मकत्वाकर्मकत्वेन ह्येव कर्मणि नो तरे। भावनादिक्रियासामान्यस्यैकत्वाभावे एकस्य
न नमेवं भवति। तत्रापि किं प्रथमातिक्रमे कारणाभावात्प्रथमपुरुषस्यैव। शय्यते इत्यत्र शीङो अयङ्
क्ङिति इति वक्तव्यं। अन्यथा शीङः सर्वत्र गुण इत्यनेन न दुर्लभे ऽपि गुणे कृते क्ङित्वित्यर्थवत्वं कार्य इत्य
तिप्रसंगित्वात् दुर्मयां। अकर्मके पिक्वचिद्विशेषमाह। अकर्मको धातुर्बाह्यकर्मरहितः सकर्मकं तो
बाह्यकर्मयुक्तो अनुभवति। कुत इति तत्राह। उपसर्गेणेति। ङकारो व्यवधानार्थो निन्यप्रयोज
नत्वात्। तेन येइतिन दीर्घः। क्रियो। क्रियेते। येइति सूत्रे ददे इत्यत्र आदिशब्दात् अनपीतिज्ञे
यम्। तेन इयात्। येइति सूत्रे न क्यपीत्यवगंतव्यं। तेन दय्या। अपि द्धा धामागेहाकुपिबसात्रोरुछा ए
तेत दादयः। अत्रापि न क्यपीति वाच्यं। तेन दायप्रदाय। अपितः दाइत्यकृतत्वात्। दाष्ट्र भवने देप्रशोधने
त्य न दायत इति अवइकारो न। अतेः संयोगादेः ऋकारस्य गुणो यक्रियङि क्ङिति णादा वारीर्यदादौ च॥ अ ॥८॥

ष्यते। स्मर्य्यते। सस्मार्यते। सस्मरतुः। स्मर्यन्ते। कश्चित् क्ङिति वाच्यं। तेन आरत्। असरत्। अर्पयति॥ सस्कुट्रूसप्रस्कणा
द्येव संचस्करतुः। क्रियमाणं तु यत्कर्म स्वयमेव प्रसिध्यति। सुकरैः स्वैर्गुणैर्यस्मात्कर्मकर्तेति तद्विदुः॥२॥ पच्यते
ओदनः स्वयमेव॥ कर्मकर्त्र्यभिधानान्नापि कर्मणि द्वितीया॥ नापि कर्तरि तृतीया॥ किंतु उभयोरभिहितत्वेन अन्या
के प्रथमा। द्विकर्मकस्योदाहरणं। न्यादयो ऽन्यं ते निः कर्मग स्यर्थमुख्यकर्मणि। प्रत्ययं यांति दुह्यादि गौणेऽन्ये
तु यथारुचि॥१॥ नीन्येबिजनमरारिजनिगमिदयाचि संचोगं। गोपाहासमकार्यं तत्रावशेषेन मनं तेन॥२॥ प्र
४र्थ्यंवे३ क्ष्यते पंथानं पथिकेन पांथः। प्रक्ष्यते पंथानं पथिनः पांथाः इत्यादि॥ ॥इत्याख्याते विकर्त्तिकचतुष्टयतावकर्म
प्रकाशः॥ ॥पुनः कर्तरि प्रक्रियाप्रणीयते॥ णबिसादि मह इत्यंतं साधयानोः परोक्षे अनद्यतने तीते इत्यर्थः।
अतीते काले णबादि प्रत्ययाः स्युरिति। द्विस्त्रेति द्विकारात् णबादौ परे स्वरादेः पर इति शेषसूत्रस्यात्रावेःसूचितः।
आसां ११ आस्थोः ६२ पा है ७१ आस्थोरिति तत्र वच्चावदोषं शब्दैर्निर्दिष्टं न परिहरन् व्याचष्टे॥ पूर्वस्याकारस्य सूत्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्रस्वेति। दीर्घकरणं तु पूर्वकार विषयं नत्वर्थी॥ तेन ह्रस्वो इति ह्रस्वो बभ्रवेत्यत्र। ननु सवर्णे दीर्घत्वेन आसेत्यादि सि
द्धो पूर्वस्याकारस्येति कथमुक्तं। सत्यं अत्र तु अदेइ ति सूत्रेण यत इ ति सूत्रेण वा पूर्वस्याकारस्य लोपः प्राप्नोत्येव
तन्निराकरणार्थं पूर्वस्याकारस्य सूक्तं। एवं चेत्तर्हि अनेन सूत्रेण अकारः किं न स्यात्॥ किमर्थमाकारः। यतोऽका
रकरणे नापि अकारलोपो निषिद्धः। ततश्च सवर्णे दीर्घत्वेन आसेत्यादि सेत्स्यति। सत्यं। आसेत्यादि यद्यपि सि
द्ध्यति तथापि आनर्चेत्यादि न सिद्ध्यति॥ अनो दीर्घकरणं। बुवो बुक् तस्य बहुना हूतो। असंगित्वे न बुक् निस्सं
योर्वक्तिला न गुण वृद्धी॥ कौदिरिति॥ छु॥ असंयुक्त ग्रहणं। तेन संचस्करीत्याणादि। किं संयोगादृ इति वक्त
व्यं॥ ममंथतुः। ममथतुः। रूतः। कितियादौ गुणो वक्तव्यः। तदेन ऋ संयोगान्ते इति सूत्रेणोक्तप्रायो तेन जजरतुः। च
करतुः। नहि पचादिर्नाम कश्चिन्नाम्बिको गुणो स्ति। तेन पपचामि तिबड्वचने न पपसहत्वं॥ धानवील्क्षणीयाः
सादृश्यं च एके हसयोर्मध्ये अकारः। अनादेशादित्वं च यथा पद गतावित्यत्र एकयोः केवलयोर्हसयोर्मध्ये अकारो ॥८॥

वर्त्तते अनादेशादित्वं कुहो श्रकृ इत्यादिना आदेशादित्वं नास्ति तस्यैत्व लोपोऽभवतः। यथा पेदे। पेचतुः। एकहसा
सावेव पठतुः। आत्रतुः। आदेशादित्वे तु जगदतुः। चकारात् तु निमित्तात्तावेपि तृफल भज त्रप श्रंथि ग्रंथ दंभी
नामेत्वलोपो स्तः। न लोपश्च उ त्रसस्त्रप फर राज भ्राज भ्लास स्यमु स्वमु स्वनु तथु फणादयः। फणादिर्हिंसा
र्थराधां वा एत्वाभ्यासलोपौ [illegible] भवतः। शाश्राद ह्रस्वकारो ह्याहानोगुणेस्त तस्य अकारस्य एत्वाभ्यासलोपौ न
स्तः। संक्षेपः। वेद्यथ पः इति क्रादि अतिरिक्तानां अनिटां धातूनां थपः इड् वा भवति। तत्र च सेट् पथः कित्वं वा
वक्तव्यं। इट्सहितेभ्यः स्वरान्तेभ्यो धातुभ्यः परस्य सेट् पथः कित्वं वा वक्तव्यं। तेन स्तजिदिदेथो वेइड् सचकि
त। यह स्त्र इट् न कित्। इत्येवं व्याख्यानमूहनीयं। अथवा सेत्रमेदेणाय व्याख्यातं तत्रोच्यते। थपो वा इट् से
ट् च थपः कित्वं वेत्युच्यमाने सर्वत्र प्रसक्तिर्दूषिः। ततो वा शब्दो व्यवस्थार्थत्वं पथेन संक्षिप्योच्यते। अर्चि
कौद स्थपः स्यादि उथ स्तजिदद्यो वेपिदेशोऽत्र तश्च निस्यानिट् तु स्वराद्ध स्ति वहिर हितमु घस्त तस्मात् तु न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यात्॥ किंत्वयंयच्चोक्तमस्मिन्भवतिखलुतदप्येत्वलोपौविधातुंनान्यत्कार्यंविरुध्यात्॥णिजगकुरि
तिस्यष्टमाध्यामुनीन्द्रा॥१॥तदेतद्विस्तरस्याक्लेशात: स्वयमाह॥ किंत्वादेत्वलोपावेतावेव
स्तः॥ नत्वलोपादिागमांस्वरेइत्यनेननुपधालोपार्थं॥ किं॥ जगमिथ॥ आरिथ॥ विव्यथि
थ॥ आदिथ॥ ससर्जिथ॥ सस्रष्ठ॥ ददरिशिथ॥ ददृष्ठ॥ पेविथ॥ पपक्थ॥ ददिथ॥ ददाथ॥ सं
चस्करिथ॥ आरिथ॥ ववरिथ॥ चकर्थ॥ ऋ सां४ अ ११ नामिनः ५१ अचतुर्णां ६२ चः छः ११
अत्र सेटो हसादेति वक्तव्यं॥ ततः कर्मणि अनुबुभूषे विद्ध्वा अनुबुभूषे विध्वे वा॥ ननु अस्तेर्भू
रसार्वधातुके इतित्वार्ववर्मणोक्तं॥ सत्यं॥ लोकाद्देषस्य सिद्धिरिति अस्मासिरपि तदंगी
क्रियत एव॥ तथापि आदेशविधेरनित्यत्वं तेरेवोक्तं॥ तेन यथायत्स्थितं स्यात्॥ अत्र आदेशो
सार्वधातुके विहितोपि प्रत्ययेविवक्षणइत्यत्र न भवति॥ तथा लावण्येनत्यादे इवका
यु

सयल इत्यादिमहाकविप्रयोगदर्शनादस्तेर्भूरादेशोप[illegible]विदोनभवति॥ नचआस इति असक्षेपणे इत्यस्यरूपं॥ अर्थासंगते
रित्यभिप्रोक्तं॥ आस॥ आसतुः॥ आसुः॥ इत्यादि॥ अथवा क्षेमेंद्रेणोक्तम्॥ असभुविइत्यस्य आसेत्यादि निर्मूक्तं॥ अस्तेर्भूःसार्व
धातुकाभावेस्मरंति॥ अथवा लावण्यउत्सादेइवासयल इत्यादि॥ महाकविप्रयोगोभूक्तं॥ अत्रापि आदेशाभावात्॥ अथवाका
यप्रयोगकृत् असदीप्तावित्यस्यापि संभवति॥ अयत्रआसदीप्ताबभूवेत्यर्थः॥ कासादिधातवः॥ कासृ आस दय अय नाम्यादिगुरु
मद्धातु अनेकस्वरधातु इति कासादयः॥ उषविदद्दरिद्राकासृकाशृजागृइतिवाकासादयइतिकेचित्॥ नरुछसुणोतीकासादिषु
पठनीयो॥ कासामास॥ कासांबभूवेत्यादिभावेरूपं॥ कर्त्तरितुपाणिनीयेनपविरुध्यते॥ तत्रआमूअस्य यवत्कृनोनुप्रयोगश्चे
त्यक्तं॥ अस्यायमर्थः॥ आमूअत्ययोयस्मात्हितः सआमूप्रत्ययः॥ चेदात्मनेपदी यदि धातुस्तर्हि अनुप्रयुक्तस्यापिकृञ
आत्मनेपदं नतु भ्वसोः॥ तेनएधामासुतुः॥ ह्यतिइतिसूत्रं प्राप्य एधामहे इतिरूपमाक्षकारे॥ आमंतमव्ययपदमित्युक्तं
त्वात्कासामितिअव्ययंपृथगेवपदं॥ चक्रेइत्यनुप्रयोगः॥ तेनव्यवधानेपिप्रयोगो घटते॥ यस्यपेनान्वयेयोग्यता तस्यतेन
दूरस्थेनापिभवतीतिन्यायात्॥ ततः प्रभ्रंशापायोन दुष्टं॥ चकारेत्यादिन विरुध्यते॥ कासामासे॥ कासांबभूवइतिनावेरूपं प्र
संगादिहदर्शितं॥ कर्त्तरितु कासामास॥ कासांबभूवेतिप्रावृत्तैस्मैपदमेव॥ आमिविदेर्नगुणः॥ नियमसूत्रमेवतत्॥ आ
कुर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिपरे विदेरेव न गुणः। अनेषां भवति। जागर्त्तेः सर्वत्र गुणो वक्तव्यः। णपूइणू विङ्किःत्क वर्जितेष्वेव। तेन जजागार। अजागा रिं। जा
गृ वी। उणादिको विप्रत्ययः। जागृतः ङित्। विदेर्लीघां इच्छंति पाणिनीयाः। विदां करोतु। भीहृभृहुवां इत्सन्नलुकवत्। दिरुक्ता
नामिति वक्तव्यं। अन्यथा बिभरामीत्यत्र कारो दुर्लभः। द्वित्वंच। परोक्षा इति णबादेः संज्ञा। सपरोक्षायोगे गिरित्ति सत्प्रत्ययेपरे
परोक्षशब्देन लिटो ग्रहणं न तु परोक्षमात्रस्य कालस्य ग्रहणं। ननु युष्मदस्मदावपरोक्षार्थौ कथं तर्हि मध्यमोत्तमे पुरु
षयोः परोक्षे प्रयोग इत्याशंक्याह। वैचित्यं विमनस्कातान्वितविभ्रमः। अपङ्कवापलापः। नयोरर्थयोर्मध्यमोत्तम
पुरुषौ भवेतामेतदर्थं युष्मदस्मदोर्ग्रहणं। नम्लृगतौ। लिङ्कार्यार्थं ल्टकार इति लिसुरुषादेर्ड इति विशेषणार्थं। गमांस्थे
इत्यत्र नेड्विति वक्तव्यम्। तेन अगम इत्यत्रा लोपाभावः। जगाम। जग्मतुः। जग्मुः। जगमिथ। जगंथ। हनोघ्नदादेशो वक्तव्यः। इ
णूयापूर्ञिंनेजिति णितीपरे न तु णपि। जघान। हनो भ इति सूत्रे हरुन्तस्य हनः परस्य दस्य घ इति वक्तव्यं। अथ च हनो
घ्न इत्यत्र हनो घ इति योगविभागः कर्त्तव्यः। तेन ञ्णनिमित्ताभावेपि घत्वं। अन्यथा अभ्यासाच्चेति पाणिनीयसूत्रविरोधः। ज
घनिथ। जघंथ। जघन्यते। जनीश्च दुर्भा दुर्भावे। ईकार इद्धित्कार्यार्थः। इति आदिदितः इति विशेषणार्थः। घस्लृ अदने।
इत्ययं धातुर्णादौ वा अदस्थाने वक्तव्यः। लुङि से च नित्यं इति विशेषणीयः। अघसत्। जिघत्सति। आद। आदतुः। आ

दुः। इत्यादि। घसादेरित्यादिशब्देन शासिवासि गृह्येते। हृतस्य क्किलादित्यनेन षत्वं भवति। अहृतत्वार्थोयमारंभः। षत्वमिति निर्णं
र्णमेव। जघसिथ। ओकारस्करणे तु आतो यु कृ प्राप्निस्तताड़ो हृतिः। तदेन्तरादृ टिलोपः अहृतेपि युकीति विशेषः। तस्थौ। अंतो
न पिइत्यत्र इटिवेति वक्तव्यं। तेन दृदिथ। तथा चोक्तं। आतो लोप इटि धातोराऽतोलोपो भवति। अनापिकृति टिचे विज्ञेयं। इश्व
उश्वरुश्च ष्ट्वतः। एतेषां दीर्घे च दीर्घं हस्वे च ह्रस्वं। स स्वरस्य संप्रसारण। नुगश्यामिति। अश्नोतिः। ऋकारादिधातुः संयोगान्ता
कारादिश्च। अशामितिबहुवचनेन गृह्यते। इत्यग्रहामिति दीर्घत्वे निषेधमाह। इटो दीर्घत्वाभावो वक्ष्यते। जग्रहिथ। ध्ये जूसं
वरणे। णादौ ब्येञः। आत्वन्नेति वक्तव्यं। अत्र वकारस्य संप्रसारणप्राप्तौ। न संप्रसारणे संप्रसारणमिति न्यायो वक्तव्यः। अ
स्य क्किति णादौ वा परस्य संप्रसारणं वक्तव्यं। न तर्वस्येत्युक्तं। संविव्याय। संविव्यतुः। संविव्यपुतुः। संविव्यायिथ इत्यादि
वेञो वयुवपि। अस्यार्थः। वेञः णादौ वा वय आदेशः। क्किति णादौ वाउ इत्यपि सामर्थ्यात् व्याख्येयं। उवाय। ऊयतुः। ऊवतुः।
ऊवुः। ऊभौ न स्तः। तदा संप्रसारणं न। तेन ववौ। ववतुः। ववुः। पत्रछेत्यत्र छकारः सर्वस्य नकारस्य ऊं तत्वात् रूपधायां न वृद्धिः।
नकारस्यैवोपधात्वं न तु अकारस्य। ततो न वृद्धिः। प्रछि भ्रस्जि व्रश्चि वेञां णादौ संप्रसारणाभावो वक्तव्यः। तदेतत्सूत्र हृयन्नी
हृ। ऋसंयोगात्परस्य णादेः प्रत्ययस्य किलत्वं न भवति। पत्रछतुरित्यादौ अकित्वान्न संप्रसारणं। उत्तरसूत्रस्येत्युक्तं। हृष्टो नः पु

पं॰टी॰

॥९९॥

ण्ययोरर्थयोः सर्वकाळे सर्वपुरुषविषये लोण्मध्यमैकवचनां तत्वंपरस्मैपदिभ्यो धातुभ्यो हि॥ आत्मनेपदिभ्यः स्व निपात्यते इत्युक्तेत
ध्वमोर्विषये अनेकक्रियासमुच्चये च विकल्पः। लोडंतपदस्य द्वित्वं वा यस्माद्धातो र्लोण्मध्यमैकवचनमुक्तम्॥ तस्यैव काळत्रित
यरूपस्यानुप्रयोगः कार्यः। लुनीहि। लुनीहीत्यस्यायम्। लुनाति। लुलाव। लविष्यति वा। लुनिहि। लुनीहीत्येवरूप। लुनी
थ। लुलुव। लविष्यथ। लुनीत वा। अधीष्व। अधीष्वइत्येतस्य रूपमधीध्वे। अधिध्यगीध्वं। अधीष्यध्वे। अधीषध्वीं वा। क्रि
यासमुच्चये तत्समानार्थवाचकस्यापि क्रियापदस्यानुप्रयोगः। सक्तून् पिब। धानाः खाद अभ्यवहर ॐ दनं भुक्त्वा। क्रिया
समुच्चये लोडंतस्य न द्वित्वमिति केचित्। एतदेव क्रियासमुच्चयोदाहरणश्लोकेनाभिनिबध्नाति। पुरीमवस्कंदेति। बलान्लु
नीअवचस्कंदेत्यर्थे अवस्कंद। पुनः पुनः नंदनं लुलावेत्यर्थे लुनीहि। बलान्दूरस्थानि मुमोषित्यर्थे मुषाण। पुनः पुनः अ
मरांगनाः अहारित्यर्थे हर। अवस्कंदादीनां सर्वेषां इहैव अस्यास्थाने चक्रे इत्यनुप्रयोगः॥ ॥इति णबादिप्रकाशः॥
॥आशिषि॥ ॥यदित्यादि सीमहीत्यंतं सां १३ आशीर्यादादेः पंक्तिं दितिवक्तव्यम्। उच्यात्॥ यज्ञदेवपूजासंग
तिकरणदानेषु। इज्यात्। श्वि। शूयात्। क्रो। हूयात्। वे। वीयात्। वे। ऊयात्। अपिट्टधामोगेह। कृपिबसोस्था इति दादिः।
गेयात्। हेयात्। स्थेयात्। देयात्। धेयात्। संयोगादिरादंतस्था वर्जितो वा दादि र्वक्तमः। ग्लायात्। ग्लेयात्। म्लायात्॥ ॥९९॥

यदा दाविति परस्मैपदोपादानेन आत्मनेपदं निवर्त्तते। तेन दासीष्टेत्यादि सिध्यति। ङकारो व्यवधा
नार्थः। रिङो ङकारो दीर्घत्वापवादाय स्यात्। तेन क्रियात्। अकारसहितः आत्। यात् सञादिर्यस्य सयादा
दिः तेन आत्मनेपदं न स्यात्। तेन कृषीष्ट। कः ब्रह्मा व अः विष्णुश्च ईशश्च दीर्घत्वं कृत्वा॥ अइए। केशाः तादृग्ग्रह
णेन ससीग्रहणां तत्रनैगुणप्राप्तोगुणाभावार्थमिहाज्ञनितोः सिस्योपरतः अकारस्यैव रुकारांतस्यैव धातोः
गुणां इति नियमसूत्रं। अन्यस्वरांतस्य इकारोकारांतस्य गुणो न भवति। अथ वा सीष्टादिप्रत्ययस्य ङित्वा
द्गुणप्रसक्तिरेव नास्ति। ङ इतिसूत्रेणाप्रसक्तप्रतिषेधः। कुत इत्याशंक्य सिद्धे सत्यारंभो नियमाय न
वति। इति न्यायात् अकारस्यैव गुणो न भवति। इडुज्जितयोः सिस्योः परयोः रिकारोकारांतस्य भवत्येवेति
नियमार्थमिदं सूत्रं। यदा च एतत् नियमसूत्रं नांगीक्रियते सिस्यो अपि ङितत्वं वा अंगीक्रियते तदा कथं वेषी
ष्टेत्यादौ गुणः तत्राह। सूत्र पाठे युः इति सूत्रं इकारस्य उकारस्य सिस्यो अनिष्टो गुणो न भवति। चेषीष्टा स्तो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बीष्टातः।कुत्रा ष्ठातङः सञ्जतोऽङःङः।ङ इति टेरिति टिलोडकार एवाबाध्यते। खोर्विसर्गः। अनिटो रिति किंव
रि बीष्टा। इटो दीर्घत्वात्तावेवक्ष्यते। श्रीः। श्च स्तेने ७१ नादिस्महेदुत्यं तं सो।ई। श्वः जविष्यतीति श्वो जावितिस्मि
न श्वो जाविनि। सिसतासीष्य पाइ॥ अत्रेच्छार्थस्यैवग्रहणं तेन जुगुप्सते। एकस्वराद्धातोः धातुपाठे अनुदा
त एवं पठिता नामि डाग मो न उवतीति ते चानुदात्ताः संगृहीताः। श्वि श्रिडीशियुरुस्तुक्ष्णुस्नुणु ष्टङ्‌वृञ्‌ वर्जिताः।
एकस्वरादिवर्णो ऽक्ष दंता धातौ वो निह।।१।। नौवादिके। वसञ्ज्ञा किमन्यती ति शासियर्थं क्षत्रं शेयन्नमिनम
हनोगमिः।। दुहलिहोवद्धि ह्दिदक्रुहोदिहि दिहि। दंशस्पृशो मश्चिशिरश्लिषीकुश्चघरा च्युद्धिसिध्यति। क्रुधः
सा धाधा।क्षु घोबधबुधियुधिश्लिषः। पिषुशिषष्पुष्ठु षिकर्षति विशिषोडुष्युष्टुबाहि श्लिपिबसिपः स्वपि
अप्लुष्ठ्योविपिस्रप्त पित्रुप्तमिदाति दः। विदिशादिखिदसदि स्तुदः। स्कंतपक्षिनो विद्य तिविंदतुदहः।। पर्च्छि
च वो रिष्यु सिचनं जिज्ञमुश्वः। सह्यंगिजो भस्तुजिसृज्यजित्यजः स्वजमज्जुजो मंजितिसंज सजोति॥५॥ति

।बादिष्वष्टाद्शोष्ठु परेषु इति स्त विष्य त्काळेति बादिनामत्त्वावात् तिबादयश्च परतः प्रयोक्तव्या
इत्यर्थः। स्तविष्यते। आत्मनपदिनं धातुमाह। यक्ष्यते सौराज्ञा। षढोः कः से। इति सकरो न स्या
देः तेन मधुलिट्सु। हन्तः स्यपद इति। गमेस्तु परस्मैपदे इति विशेषणात् आत्मनेपदे न भव
ति। तेन संगंस्यते। स्वसेच पाइ सवर्णत्वेन दस्यतः। ल्सेत्स्यति। तुद व्यथने। तोत्स्यति। हाङ् गतौ। हा
स्यते। पुङ् अभिषवे। सोष्यति। षूङ् प्राणिप्रसवे। सोष्यते। सोष्यति। स विष्यति। स विष्यते। युङ्
कुः स्वसेच पा ति सवर्णत्वेन ग स्यकः। भोक्ष्यति। स्मृ स्यर्थं धातुयोगे य द्ड़ि ति स्मृतान घ
तनेपि स्यप्र। स्मरसि मित्र ग्रामं गमिष्यावः। यदि तु अभिजानासि मित्र यत् ग्राममगच्छा
वा। कुत इति कारणात् क्रियायाः अनिष्पत्तौ। यद्या सिष्यदिति आसन्नपवेशाने। स्तमा
त्रे द्विरिति। अतने स्तते अद्यतनेवा। अस्तद्विषिः। अद्यवापूर्वेद्युः। दादेःपेदस्यत्र घे दूरा च्छासा
प्ताप्ते वार्त्ता। सत्व लोपो लुग्वक्तव्यः। तेनास्त दिसत्र गुणो द्वृद्धयो न प्राप्नुयुः। यद्यान्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सारस्व०टी०
॥१३॥

ञ्चिषये दि मिपां पित्त्वं नेष्टं ते नापि न गुणाः। स्नू सन्नायामित्यस्य धातोः सिलोपे सति स्वरे परे वुगा
गमो वक्तव्य उ आर उ आरणार्थः। सिलोपे किं। नू इ आप्तौ आत्मनेपदे। असविष्ठ। सिष्ठ आष्ठ चिद्
स्या विद्रुतस्त।५। से राकारांता सिलोपे च दृश्या वे तुल ङि वा अन उ सूत्रवति। शुव स्त ते ति वाक्यं।
अश्रव नू उ वा लोपः। अ डुः। धे टू पाने। सं ध्य ह्नराणामा। अ ध्यात। अ ध्यासीत। धेयोर्द आदेश
श्च वा। अदध। अदधतां। अदधन्। मेट इति क विन्न स्रवति मा निषाद प्रतिष्ठा त्वमगमः शा
श्वतीः समाः। क्रौंच मिथुनादेकमवधीः काममोहितं ॥१॥ इत्यादि प्रयोग दर्शनादिति। मा
घटिष्टे ति न घटते। न घटतां। न घटिष्यते। न घटते स्म इत्यर्थे प्रयोगः। काळत्रये पिउदा
हरणत्रये ज्ञातव्यः। अरे इति संबोधने हि न संबोधने तु रे प्रयोग इति। अरे स ध संमागाः
न प्राप्तः। न प्रापत्। न प्रापत्। न प्राप्नु हि न प्राप्स्यसीत्यर्थः। अहं गवित मं दिरं मार्गा। न गतः। न गच्छा
मि। न गमिष्यामीत्यर्थः। केवळस्म योगे पि अटो लोपं केचिदिच्छंति। एवं स्मस्त दिति तन्नसार
न्न सारस्वतमते अपितु परमते। मास्मस्त दिति तु मन्यते। मा [illegible] न्च य स्य व्या ख्यानेप्प विरोधात्।
॥१३॥

वर्त्तमानार्थायाअपि विभक्तेः स्मेन संयोगे अतीतेऽपि भवति। डुकृञ् करणे। कृतेसिः। अट्। वावसाने वृद्धिः। किला
सः। अकार्षु तइति स्थिते। सेरिति इडागमः। स्वरहीनं। अकार्षीत्। स्यावित्। अकार्षुः। उपधायां वृद्धिः। इड
गमश्च। इट ईटीति सिलोपः। सवर्णे दीर्घः। अवादीत्। अवादिष्टाम्। अवादिषुः। स्यं तेति। हकारांतमकारां
तयकारांतानां क्षणु हिंसायां। श्वस प्राणने। जागृ निद्राक्षये। हसादिः। राध्ट्रेन। हस हसने। स्कगे कटेअ भूतपः
एकारेतः। दुओश्विगतिवृध्योः। एते वैदितव्याः। अहसीत्। स्कगीत्। अकटीत्। अश्वयीत्। वद व्रज अ रंत
अलंतस्वरांतानां नित्यं वृद्धिः। सेटो हसादेरकारो पधस्य वा वृद्धिः। अवादीत्। प्राव्राजीत्। असारीत्। अ
धारीत्। अदालीत्। अगादीत्। अगदीत्। अहृत। अहृषतां। अदित। अधितेत्यादि दृदेति सूत्रेण इ
त्वं चेत्। क्षिपति तर्हि गेहा। कुपिवसां भावकर्मणोरात्मनेपदिनां। अगायि। अगायिषातामित्यादि। विवृदु
र्गरां। ततो अपि द्वधास्छामित्वं से ङित्वमिति वक्तव्यम्। ततो लुप्ते सो गुणाभावः। इङिकावुवध्युपसं
र्गतो न व्यभिचरतः। इङ् इण् वत्कार्यः। इङो वा गीसो। इङो धातोः वा ईकारांतो गी आदेशो भवति। इकारां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्वविशेषणात्गुणाभावः॥ अध्यगीष्ट। अध्यगीषातां। अध्यगीषत॥ अध्यगीष्ठाः॥ अध्यगीषाथां॥ ध्वे वसे लोपः। अध्यगीध्वं॥ अध्यगीषि। अध्यगीष्वहि। अध्यगीष्महि। पक्षे अङ्। अइए। स्वरोदः। एऐए। अध्यैए। अध्यैषातां। अध्यैषत। अध्यैष्ठाः। अध्यैषाथां। अध्यैढ्वं। अध्यैषि। अध्यैष्वहि। अध्यैष्महि। इकु स्मरणे। अगात्। अगातां। अगुः। इत्यादि। अरावीत्। अराविष्टां। अराविषुः। स्याविषुः। डुपचष् पाके। अपाक्षीत्। अपक्तां। झबे जबाः इति सवर्णे लोकस्य गः। अपग्ध्वं। अपक्षि। अपक्ष्वहि। अपक्ष्महि। परस्मैपदे। अपाक्षीत्॥ झसादिति सिलोपः॥ अपाक्तां। अपाक्षुः इत्यादि परस्मैपदे। प्रछ। प्रछे सू इति स्थिते। छ्शाष इति षत्वं। णिसेः। वृद्धिः। षढोः कः से। कषसंयोगे क्षः। सेः। अप्राक्षीत्। अप्राष्टां। ननु लोपो ह्रस्वात् झसे इदमेव सत्वं लोपो दीर्घात् झसे इति कर्तव्ये तेन अ ह्रस्वे ह्रस्वाद्यादौ अपाक्तामित्यादौ च सिलोपो न विष्यतीति। झसादिति सत्वं किमर्थमिति तत्राह॥ नन्वेवं ऐधिषे त्यादावपि सिलोपः आमोति। सत्र द्वयेनुक्ते ऐधिषे त्यादौ झसात् ह्रस्वाच्च धात्ववयवात् उत्तरत्वाभावान्न सिलोपः॥ ॥१४॥

ऐधिषातां। ऐधिषत। झसादिति किं। आविरुपसर्गः पूर्वः। आविरकार्षीत्। आविरकार्ष्टां। आविरकार्षुः॥ झसे ति किं। अपक्षातां। सिसतासीस्यपामिट्॥ अराविष्ट। अराविषातां। इरइत् यस्य स इरित् तस्मात् इरितः। ङ प्रत्ययश्चायं परस्मैपद एव भवति। ङकारो गुणप्रतिषेधार्थः। अरुधत्। पक्षे। अरुधसी ति प्रत्ययः। दिपपरः वृद्धिः। रवसेच पा॥ से॥ असरौत्सीत्। नत्थोर्धः। झबे जबाः। अरौद्धां। अरौत्सुः॥ आत्मनेपदे। अरुद्ध। अरुत्सातां। छिदिर्। अछिदत्। पक्षे। अछैत्सीत्। आत्मनेपदे। अछित्त। अछित्सातां। अछित्सत। अवेदीत्। अवेदिष्टां। असेवीत्। असेविष्टां। अत्र नामिवत्वे अनिट्त्वा भावान्न वृद्धिः। अनिटो नामिवतः। अत्र नामियहणं हशषे तिसर्वार्थं। तेन नामिमात्रस्य नाम्यना मिस्थानेव वृद्धिर्भवति। नहि अर्दिदस्थाने वृद्धिः। नामिस्थाने इत्युक्ते। आरे औ वृद्धिरित्यत्र अरदोनामिनः अनुवृत्तेः। स्कंदिर्। अस्कात्सीत्। अरांक्षीत्॥ इत्यनामिस्थाने वृद्धिः। नोक्तमनियमिति। नोक्तं गुणाभावलक्षणं कार्यमनियं। अनियतां तेन रुदशोर्ङिगुणः। अजरत्। असरत्। आरत्। अजरदिति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सारस्व॰टी॰
॥९५

ति२

रसां॥ ८ अरह्व्यसे ९ द्व्यां द्वर्धा॥मितिबहुवचनां तद्दरर स्थत्ष्कषु म स्य स्पृ ध्वपूत्पु रूप्रोदृद्धा॥ दृग॥ क्षुपादीनां वेति
केचित्॥ इत्येतेषां अरो भवतिन त्वत्र सिस्योरि अनिटोः सिस्योरुपधागुणङगिषेधात् अरु इति गुण निर्देशात् अनुपपन्नः
सन्न कश्चिन्निषेधोऽपि ऋकारस्य गुणो भवतीति ज्ञापयति॥ तेनोक्तस्यापि नित्यत्वात्॥ आर त्॥ अदर्शत्॥ इत्यत्र गुणः सि
ध्यतीति भावः॥ तेन गुण निर्देशस्यान्यार्थत्वात्॥ अस्य इत्यके नस्पस्छानिनः ऋकारस्यैव ऋकारः॥ यद्वा॥ अर इति तं आेपा
दे देव अथ मं गुणस्ततोऽरोरत्वं पश्चाद्वृद्धिः॥ यद्वा॥ रा॥ आर॥ इत्युक्तं॥ आर इति वृद्धेः स्थाने रा इति आदेशः॥ अदर्शत्
अद्राक्षीत्॥ असृक्षात्॥ अस्राक्षीत्॥ कृषु॥ अकार्क्षीत्॥ अक्राक्षीत्॥ सिस्योरिति नियमसूत्रमिदं॥ अनिटोः सिस्योः परतः
उपधायाः एव गुणो न भवति॥ अन्यत्र तु भवत्येव॥ ह्रस्वादितिसिलोपः॥ अभित्त॥ अभित्सिद्धत्॥ अभित्सिदतां॥ अभित्सिदन्॥ अभित्सीवा॥
अभित्सैतां॥ अवर्तिष्ट॥ अवर्तिषातां॥ अत्र नियमनिष्ठा॥ तेन अनिष्ठत्वात्तावात् गुणः॥ पुषादेरित्यादिना ङः॥ न घनत्थुत् रुच
ख्या॥ अस्यतिवचूशासृपूलेस्विदुद्भ्रुत्र्वस्य एते पठनीयाः॥ लिपादीनां चेआत्मनेपदे चेति भावः॥ अगमदित्यत्र गमोऽस्य
रइति यथा न प्राप्नोति॥ तथोक्तं॥ उःपरे तपः पुमन्नस्यतेः थुक् वक्तव्यो॥ अपप्तत्॥ आस्थत्॥ इरितां लितां पुषादीनां त्यं ता ॥९५
नां च कर्त्रर्थे ङ इत्युक्ते एवास्यातिवक्तिख्यात्यः पदद्वयेऽपि॥ हृज्ञाषांतादित्यत्र न हृज्ञा इति वक्तव्यं॥ श्लिष आलिङ्गने॥

सक्॥ अश्लिक्षत्॥ न यत्र कि तेसृणां न वोढा॥ पक्षे॥ पुषादित्वात् अश्लिषत्॥ सकोऽश्लोपो बहुवचने स्वरे वाच्यः॥ न्यविक्षता
न्यविक्षतां॥ न्यविक्षत॥ न्यविक्षतइत्यादि॥ ॥इति पाबादिङ्विलक्षीनाक्त प्रक्रिया॥ ॥ छ्रू॥ ऋतुरवमनु बन्धवे देवदत्तेन॥
अन्वबुधुपूर्वस्य भवतेर्ज्ञानार्थत्वात् सकर्मकत्वं॥ तस्मात्कर्मणि प्रत्ययः॥ कादेरित्यत्र कादेरेवेति नियमादिट्प्रत्ययः॥
अनुबभूविषे॥ अनुबभूवाथे॥ अनुबभूविरे॥ नामिनोश्चतुर्णां घो ढः॥ अनुबभूविढ्वे॥ नुवोः कार्त्तिति॥ नुवः पूर्वस्य वा अ
र्थे भवति अनुकर्तरि॥ तेन भावकर्मणोर्वा आत्वं॥ तेन बभूवे॥ बभूवाते इत्यादि॥ आनोनपि ददे॥ ददाते॥ ददिरे॥ सस्ने हंसस्य
विलासइव विलासो गमनं लीला यस्याः सा तस्याः॥ स्वरांतानां सेटो धातूनां भावकर्मणोरर्थयोर्येसी सता सीस्य पः ते वा
भ्राशीयः इट् सवर्णि हृन्यः॥ वाशब्दस्य व्यवस्थितत्वेन अनित्यमपि स्वरांतानां नासीस्य पां वा इट् भवति स्वर्णादिति
स्वचितां॥ एवं हनदृशोरनिटो वा इट् स्वर्णपितः अ ग्रहस्तु सेटः परः इट् वा णित्॥ स्वरांतानां धातूनां हनग्रहदृशां च भावकर्मणोः
सिसनासीस्य पां इट् वदिट् भावक्तव्यः॥ अन्यथा इट्पिरे दीर्घत्वे लोपे दुर्लभः॥ अभावि षातां॥ अभाविषातां॥ अभविषातां॥ अनुभाविषी
ष्टा॥ णित्वात् भावे अनुभाविषीष्ट॥ भवत्ले॥ अनुभविता॥ अनुभाविता॥ स्यपि॥ अनुभाविष्यते॥ अनुभविष्यते॥ स्यपु क्रियाति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सारस्वतटी
॥१६॥

क्रमे॥ अन्वत्तो विष्पत॥ त्वयातत्वंयघओष्पत्न॥ स्तेत। अञ्चजागि॥ भगोत्वता॥ भवःसंसारः॥ द्विर्वचनदो
वाणिद्दिदूस्वरांतानां इत्यादिना॥ अन्चजाविषातां। अन्चजाविषातं॥ अन्चजागिदूं॥ दूणरसेनियोगश्चे
ति चकारात् अन्तोजि इत्यादोगुणःसूचितः॥ अपाचि॥ अपक्षातां॥ अपक्षत॥ अजोजि॥ अभु
क्षातां। अभुक्षत॥ अधारि॥ अधारिषातां॥ अधारिषत॥ अधृषातां॥ अधृषत॥ सटश्च
सेर्निरिवंवक्तव्यं॥ अजाणि॥ अजाणिषातां॥ अजाणिषत॥ अवादि॥ अवादिषातां॥ अवादि
षत॥ अग्राहि॥ अग्राहिषातां॥ अग्राहिषत॥ णित्वाजावे॥ अग्रहीषातां॥ अग्रहीषत॥ इटो
ग्रहाम्रितिदीर्घः इतिवहुवचनेनकृतदुःश्वग्रहणं॥ हनोदधदेशश्च प्रसज्यते॥ दूणरवदूद
दूदूणरणपूवर्जितेिणितिपरे॥ अघानि॥ अघानिषातां॥ अघानिषत॥ पक्षोहनःसि
